योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ४६

षट्चत्वारिंशः सर्गः ४६

श्रीवसिष्ठ उवाच ।

विलासिनीभिर्वलितो मन्त्रिमण्डलपूजितः ।

वन्दितः सर्वसामन्तैश्छत्रचामरलालितः ।। १

सिद्धानुशासनः कान्तो ज्ञातराज्यगुणक्रमः ।

वीतशोकभयायासप्रज्ञः प्राप्तमहादशः ।। २

विस्मृतात्मस्वभावोऽभूदनिशं स्तवमङ्गलैः ।

आनन्दपूर्णया वृत्त्या भृशं क्षीव इवासवैः ।। ३

कीरेषु श्वपचो राज्यं वर्षाण्यष्टौ चकार ह ।

आर्यवृत्तमशेषेण तावत्कालं बभार ह ।। ४

यदृच्छयैकदाथासावतिष्ठत्त्यक्तभूषणः ।

अतमस्तारकेन्द्वर्कतेजोऽम्भोदमिवाम्बरम् ।। ५

बह्वमन्यत नो हारकेयूरवलयान्यसौ ।

प्रभुताबृंहितं चेतो नाहार्यमभिनन्दति ।। ६

एक एवाजिरं बाह्यं तादृग्वेषः स निर्ययौ ।

मुख्याङ्गं णान्नभोभागादस्तं गच्छन्निवांशुमान् ।। ७

तत्रापश्यद्धनं श्यामं पीनं श्वपचपेटकम् ।

गायन्मृदु वसन्तोत्थं कोकिलानामिव व्रजम् ।। ८

धुनानं वल्लकीतन्त्रीं करपल्लवलीलया ।

मृदुरेफं रणद्रेफामलिश्रेणिमिव द्रुमम् ।। ९

एकस्तस्मात्समुत्तस्थौ जरावान्रक्तलोचनः ।

काचश्रृङ्गहिमापूर्णमिव श्वपचनायकः ।। १०
भो कटंजेति सहसा वदन्कीरमहीपतिम् ।
इह राजा भवन्तं वा कच्चिद्गेयक्रियाविदम् ।। ११
रक्तकण्ठं मानयति रागवानिव कोकिलम् ।
आपूरयति वा कच्चिद्गृहवस्त्रासनार्पणैः ।। १२
मधू रसालविटपं फलपुष्पभरैरिव ।
दर्शनेन तवाद्याहं परां निर्वृतिमागतः ।। १३
पद्मं सूर्योदयेनेव चन्द्रोदय इवौषधी ।
आनन्दानामशेषाणां लाभानां महतामपि ।। १४
विश्रामाणामनन्तानां सीमान्तो बन्धुदर्शनम् ।
श्वपचे प्रवदत्येवं राजा यावत्तया तया ।
चकार तत्कालजया चेष्टयैवावधीरणम् ।। १५
तावद्वातायनगताः कान्ताः प्रकृतयस्तथा ।
श्वपचोऽयमिति ज्ञात्वा म्लानतामलमाययुः ।। १६
पद्मास्तुषारप्रावृष्ट्या ग्रामाः सावग्रहा इव ।
दाववन्त इवाद्रीन्द्रा नागरा न विरेजिरे ।। १७
नृपोऽवधीरयामास तां तां श्वपचसंकथाम् ।
वृक्षाग्रगतमार्जारफेत्कारं मृगराडिव ।। १८
सत्वरं प्रविवेशान्तःपुरमाम्लानमानवम् ।
राजहंस इवावर्षे सीदत्सरसिजं सरः ।। १९
सर्वावयवविश्रान्तां म्लाननामयमाययौ ।
जानुस्तम्भान्तरमहारन्ध्राग्निरिव दुर्द्रुमः ।। २०
तत्रापश्यदसौ सर्वं विषण्णवदनं जनम् ।
जालं कुङ्कुमपुष्पाणां भुक्तमूलमिवाखुना ।। २१
मन्त्रिणो नागरा नार्यस्ततस्ते तं महीपतिम् ।
नास्प्राक्षुरपि तिष्ठन्तं गृह एव शवं यथा ।। २२

भृत्याश्वाकृतसत्कारं दूर एनमथात्यजन् ।
दुःखयुक्ता घनस्नेहा अपि बालाः शवं यथा ।। २३
अनानन्दमुखं श्यामं शरीरं श्रीविवर्जितम् ।
दग्धं स्थलमिवैनं ते बह्वमन्यन्त नाकुलाः ।। २४
धूमायमानदेहस्य परितापदशावती ।
नाढौकतास्य जनता पार्श्वमग्निर्गिरेरिव ।। २५
मन्दोत्साहाः समुद्भूताः सभ्यसंघातवर्जिताः ।
न तदाज्ञाः पदं प्रापुर्भस्मनीवाम्बुविप्रुषः ।। २६
क्रूरकर्मकराकारात्संगताशुभदायिनः ।
तस्माद्विशेषेण जना राक्षसादिव दुद्रुवुः ।। २७
एक एव बभूवासौ जनमध्यगतोऽपि सन् ।
अर्थादिगुणनिर्मुक्तः परदेश इवाध्वगः ।। २८
भृशमालपतेऽप्यस्मे नालापं नागरा ददुः ।
मुक्ताजालयुतायापि कीचकायाध्वगा इव ।। २९
अथ सर्वे वयं दीर्घकालं श्वपचदूषिताः ।
प्रायश्चित्तैर्न शुद्ध्यामः प्रविशामो हुताशनम् ।। ३०
इति निर्णीय नगरे नागरा मन्त्रिणस्तथा ।
अभितो ज्वालयामासुश्चिताः शुष्केन्धनैधिताः ।। ३१
ज्वलितास्वभितस्तासु तारकास्विव खे तदा ।
बभूव नगरं सर्वमाक्रन्दपरमानवम् ।। ३२
करुणारावमुखरैः कलत्रैर्बाष्पवर्षिभिः ।
अवष्टब्धं ज्वलत्कुण्डोपान्तमन्दरुदत्प्रजम् ।। ३३
अग्निकुण्डप्रविष्टानां मन्त्रिणां भृत्यरोदनैः ।
रुदत्क्रन्ददृढतरमरण्यमिव मारुतैः ।। ३४
चितादीपितविप्रेन्द्रमांसमांसलगन्धया ।
जातनीहारमुत्पातवात्ययावकरोद्धतैः ।। ३५

वातदीर्घवसागन्धदूरानीतखगोर्जितैः ।
चक्रैर्व्योभाभवच्छन्नभास्करं जलदैरिव ।। ३६
वातोद्धूतचितावह्निप्रज्वलद्व्योममण्डलम् ।
उड्डीनाग्निकणव्राततारासारदिगन्तरम् ।। ३७
प्रमत्ततस्करक्रन्दद्वेल्लद्बालकुमारकम् ।
संत्रस्तनागरापास्तजीविताख्यमसंस्थिति ।। ३८
अलक्षितगृहं चौरलुण्ठिताखिलसंचयम् ।
त्यक्तपुत्रकलत्रं तन्मरणव्यग्रनागरम् ।। ३९
तस्मिंस्तथा वर्तमाने कष्टे विधिविपर्यये ।
अशेषजनताशेषकल्पान्तसदृशस्थितौ ।। ४०
राज्यसज्जनसंपर्कपवित्रीकृतधीरधीः ।
गवलश्चिन्तयामास शोकेनाकुलचेतनः ।। ४१
मदर्थे हि कदर्थोऽयं देशेऽस्मिन्स्थितिमागतः ।
अकालकल्पान्तमयः सर्वनायकनाशनः ।। ४२
किं मे जीवितदुःखेन मरणं मे महोत्सवः ।
लोकनिन्द्यस्य दुर्जन्तोर्जीवितान्मरणं वरम् ।। ४३
इति निश्चित्य गवलो ज्वलिते ज्वलने पुनः ।
पतङ्गवदनुद्वेगमकरोदाहुतिं वपुः ।। ४४
तस्मिन्बलाद्गवलनाम्नि हुताशराशौ
देहे पतत्यवयवाकुलतां प्रयाते ।
स्वाङ्गावदाहदहनस्फुरणानुरोधा-
दन्तर्जले झटिति बोधमवाप गाधिः ।। ४५
श्रीवाल्मीकिरुवाच ।
इत्युक्तवत्यथ मुनौ दिवसो जगाम
सायंतनाय विधयेऽस्तमिनो जगाम ।
स्नातुं सभा कृतनमस्करणा जगाम

श्यामाक्षये रविकरैश्च सहाजगाम ।। ४६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षो० उपशमप्रकरणे गाधिवृत्तान्ते राज्यभ्रंशो नाम षट्चत्वारिंशः सर्गः ।।

४६ ।।